**SNBP INTERNATIONAL & Sr. SECONDARY SCHOOL, CHIKHALI, PUNE**
**AFFILIATION NO. 1130703**

**Answerkey 2024-25**

| GRADE: VIII | SUBJECT: SANSKRIT | DATE: 14/02 / 2025 | TIME: 3 HRS | MARKS: 60 |
|---|---|---|---|---|

**निर्देशाः** –(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति |

खण्डः (**क**) अपठित-अवबोधनम्- 8 अङ्का: खण्डः(**ख**) रचनात्मक-कार्यम् - 12 अङ्का:

खण्डः (**ग**) अनुप्रयुक्त व्याकरणम्- 18अङ्का: खण्डः(**घ**) पठित-अवबोधनम् - 22 अङ्का:

(ii) सर्वे प्रश्नाः अनिवार्याः | (iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि |

(iv) प्रश्न संख्या अवश्यं लेखनीया | (v) उत्तराणि संस्कृतेन एव लेखनीयानि |

---

**प्र .1- अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि निर्देशानुसारं लिखत-**

भगवान् श्रीकृष्ण: महायोगी आसीत् | तस्य माता देवकी जनकः च वसुदेवः आस्ताम् | सः बाल्यकालादेव विलक्षणः आसीत् |सः शीघ्रमेव सर्वासु विद्यासु योग्यताम् अलभत | सः शस्त्रेषु शास्त्रेषु च अतीव निपुणः आसीत् | सः मुरलिवादने तु अनुपम आसीत् | सः बहूनां दानवानां वधम् अकरोत् | सः महान् नीतिज्ञः अपि आसीत् | सः अर्जुनाय गीतायाः उपदेशम् अयच्छत् | तस्य जन्मदिवसः श्रीकृष्ण-जन्माष्टमी इति पर्वरूपेण मन्यते |

**I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए)** **2Q×1M=2M**

**(क)** महायोगी कः आसीत् ?- **भगवान् श्रीकृष्ण:** **(ख)** सः कस्मिन् अनुपमः आसीत्?- **मुरलिवादने**

**II. पुर्णवाक्येन उत्तरत-** **2Q×2M=4M**

**(क)** सः केषु अतीव निपुणः आसीत्?
**उत्तरम्-** सः शस्त्रेषु शास्त्रेषु च अतीव निपुणः आसीत् |

**(ख )** सः केषां वधम् अकरोत् ?
**उत्तरम्-** सः बहूनां दानवानां वधम् अकरोत् |

**III. यथानिर्देशम् उत्तरत-** **2Q×1M=2M**

**(क)** "कुशलः" इति पदस्य पर्यायपदं लिखत? **उत्तरम्- i) निपुणः** ii) अतीव iii) अनुपमः

**(ग )** "अयच्छत्" अस्मिन् पदे कः लकारः? i) लोट ii) लृट् **उत्तरम्- iii) लङ्.**

**खण्ड – (ख) रचनात्मक कार्यम्- {10 अङ्का:}**

**प्र.2- चित्रं दृष्ट्वा मञ्जूषातः पदानि च प्रयुज्य पञ्च वाक्यानि रचयत –** **5Q×1M=5M**



1. एतत् चित्रं वनमहोत्सवस्य अस्ति |
2- चित्रे छात्राः वृक्षारोपनं कुर्वन्ति |
3- अत्र अध्यापकः निर्देशं ददति |
4- चित्रे वृक्षाः सन्ति |
5- चित्रे शुद्धं वातावरणम् दृश्यते |
6- एकः छात्रः जलपात्रेण जलं यच्छति |
7- आकाशे मेघाः सन्ति |

**मञ्जूषा-** वनमहोत्सवस्य, छात्राः, वृक्षारोपनम्, अध्यापकः कुर्वन्ति, निर्देशम्, जलपात्रेण, यच्छति, सन्ति करोति, जलं, वातावरणम्, अस्ति, बालिका, शुध्दम्, आकाशे, वृक्षाः, मेघाः |

**प्र. 3- स्वाध्याय –प्रगतिविषयकं भगिन्यै लिखितं पत्रं मञ्जूषायाः सहायतया पूरयत-** **5Q ×1M=5M**

छात्रावासः
अभिनव संजित विद्यालयः

त्रिवेन्द्रम्, केरलः
दिनाङ्क-
आदरणीये भगिनि !
सप्रेमः (i) **नमोनमः** |
अत्र कुशलं तत्रास्तु | भवतः प्रेरणा पत्रं (ii) **प्राप्य** अहम् अध्ययने संलग्नः अस्मि | अधुना अहम् (iii) **प्रगतिविषयम्** एका होरा प्रतिदिनं ददामि| (iv) **गृहकार्यम्** प्रतिदिनम् अवश्यमेव करोमि | अधुना भवत्या मम (v) **चिन्ता** न करणीया | पितृभ्यां नमोनमः |
भवदीय प्रियभ्राता
अशोकः

**मञ्जूषा-** चिन्ता, गृहकार्यम्, प्रगतिविषयम्, नमोनमः, प्राप्य

**प्र. 4- अधोलिखित हिन्दी वाक्यानां संस्कृत भाषायाम् अनुवादं कुरुत- ( कोऽपि द्वौ )** **2Q×1M=2M**

**(i)** मै सुबह विद्यालय जाता हूँ |
**उत्तरम्-** अहम् प्रातः विद्यालयं गच्छामि |

**(ii)** तुम सब लिखते हो |
**उत्तरम्-** यूयम् लिखामः |

**(iii)** हम सब कल बाहर जायेंगें |
**उत्तरम्-** वयम् श्वः बहिः गच्छामः |

**(iv)** वह क्या करता है ?
**उत्तरम्-** सः किं करोति |

**खण्ड (ग) अनुप्रयुक्त व्याकरणम् {18 अङ्का:}**

**प्र. 5- अधोलिखित शब्दानां सन्धिं विच्छेदं च कुरुत- (कोऽपि पञ्च)** **5Q×1M=5M**

| | | | |
|---|---|---|---|
| **(i)** प्रत्युपकारः | **(ii)** सर्वेश्वरः | **(iii)** ममैव | **(iv)** भवनम् |
| **= प्रति +उपकारः** | **= सर्व+ ईश्वरः** | **= मम+ एव** | **= भो+ अनम्** |
| **(v)** पुस्तक + आलयः | **(vi)** महा + ऋषि: | **(vii)** शे + अनम् | **(viii)** विष्णो + ए |
| **= पुस्तकालयः** | **= महर्षिः** | **= शयनम्** | **= विष्णवे** |

**प्र. 6- अधोलिखित पदानि निर्देशानुसारं परिवर्तयत-(कोऽपि पञ्च)** **5Q×1M=5M**

| | | |
|---|---|---|
| **i)** बालक | (सप्तमी एकवचनम् ) | - **बालके** - |
| **ii)** लता | (चतुर्थी एकवचनम् ) | = **लतायै** |
| **iii)** कवि | ( तृतीया एकवचनम्) | = **कविना** |
| **iv)** गुरु | ( पंचमी द्विवचनम्) | = **गुरुभ्याम्** |
| **v)** तत् (स्त्री.) | ( द्वितीया बहुवचनम् ) | = **ताः** |
| **vi)** अस्मद् | ( षष्टि बहुवचनम् ) | = **अस्माकम्** |

**प्र. 7- लट् लकारपदेभ्यः लृट्, लोट् लकार पदानां निर्माणं कुरुत-- ( कोऽपि पञ्च )** **5Q×1M=5M**

| लट् लकारे | लृट् लकारे | लोट् लकारे |
|---|---|---|
| i) गच्छन्ति | **गमिष्यन्ति** | **गच्छन्तु** |
| ii) वदति | **वदिष्यति** | **वदतु** |
| iii) पठामि | **पठिष्यामि** | **पठानि** |
| iv) लिखसि | **लेखिष्यसि** | **लिख** |
| v) धावामः | **धाविष्यामः** | **धावाम** |
| vi) क्रीडति | **क्रीडिष्यति** | **क्रीडतु** |

**प्र. 8 अधोलिखितानां शब्दानां प्रकृति प्रत्यय विभागं कृत्वा लिखत-** **6Q×1/2M=3M**

i) खादित्वा = **खाद् + क्त्वा**
ii) लिखित्वा = **लिख् + क्त्वा**
iii) संपठ्य = **सम्+ पठ + ल्यप्**
iv) परित्यज्य = **परि + त्यज् + ल्यप्**
v) कर्तुम् = **कृ + तुमुन्**
vi) गन्तुम् = **गम् + तुमुन्**

## खण्ड (घ) पठित अवबोधनम् {22 अङ्का:}

**प्र.9- अधोलिखित गद्यांशं, पद्यांशं , नाट्यांशं च पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

**(अ)गद्यांश –**

पूर्वदिशायाम् उदेति सूर्यः पश्चिमदिशायां च अस्तं गच्छति इति दृश्यते हि लोके | परं न अनेन अवबोध्यमस्ति यत्सूर्यो गतिशीलः इति | सूर्योऽचलः पृथिवी च चला या स्वकीये अक्षे घूर्णति इति साम्प्रतं सुस्थापितः सिद्धान्तः| सिद्धान्तोऽयं प्राथम्येन येन प्रवर्तितः, स आसीत् महान् गणितज्ञः ज्योतिर्विच्च आर्यभटः |पृथिवी स्थिरा वर्तते इति परम्परया प्रचलिता रूढिः तेन प्रत्यादिष्टा |

**(क) एकपदेन उत्तरत-** **2Q×1/2M=1M**

i) सूर्यः कस्याम् दिशायाम् उदेति?- **पूर्वदिशायाम्**
ii) स्वकीये अक्षे का घूर्णति ?- **पृथिवी**

**(ख) पुर्णवाक्येन उत्तरत- ( केवलं प्रश्न एकम् )** **1Q×2M =2 M**

i) का प्रचलिता रूढिः तेन प्रत्यादिष्टा ? **उत्तरम्**= पृथिवी स्थिरा वर्तते इति परम्परया प्रचलिता रूढिः तेन प्रत्यादिष्टा |

**(ग) यथानिर्देशम् उत्तरत-** **2Q×1M=2M**

i) पूर्वदिशायाम् इति पदस्य विलोमपदं लिखत ? उत्तरम्= **पश्चिमदिशायां**
ii) “पृथिवी स्थिरा वर्तते” अत्र वर्तते क्रियापदस्य कर्ता कः? उत्तरम्- **पृथिवी**

**(आ)पद्यांश –**

सुपूर्ण सदैवास्ति खाद्यान्नभाण्डम्
नदीनां जलं यत्र पीयूषतुल्यम्।
इयं स्वर्णवद् भाति शस्यैर्धरेयं
क्षितौ राजते भारतस्वर्णभूमिः॥

**(क) एकपदेन उत्तरत-** **2Q×1/2M=1M**

i) सदैव भारतस्य किं सुपूर्णमस्ति? = **खाद्यान्नभाण्डम्**
ii) भारतस्य नदीनां जलं कीदृशमस्ति?= **पीयूषतुल्यम्।**

**(ख) पुर्णवाक्येन उत्तरत- ( केवलं प्रश्न एकम् )** **1Q×2M =2 M**

i) इयं भारतस्य धरा शस्यैः कीदृशी भाति? **उत्तरम्-** इयं भारतस्य धरा शस्यैः स्वर्णवद् भाति|

**(ग) यथानिर्देशम् उत्तरत-** **2Q×1M=2M**

i) श्लोके ‘अमृत’ इत्यस्य पदस्य कः पर्यायः आगतः? (क) जलम् **(ख) पीयूष** (ग) सुपूर्णम्
ii) ‘राजते’ इति क्रियापदस्य कर्तृपदं श्लोके किम् आगतम्? (क) भारतम् (ख) स्वर्णभूमिः **(ग) भारतस्वर्णभूमिः**

**(आ) नाट्यांश –**

(ग्रीष्मर्तौ सायंकाले विद्युदभावे प्रचण्डोष्मणा पीडितः वैभवः गृहात् निष्क्रामति)

वैभवः – अरे परमिन्दर्! अपि त्वमपि विद्युदभावेन पीडितः बहिरागतः?

परमिन्दर् – आम् मित्र! एकतः प्रचण्डातपकालः अन्यतश्च विद्युदभावः परं बहिरागत्यापि पश्यामि यत् वायुवेगः तु सर्वथाऽवरुद्धः। सत्यमेवोक्तम् ।

प्राणिति पवनेन जगत् सकलं, सृष्टिर्निखिला चैतन्यमयी।
क्षणमपि न जीव्यतेऽनेन विना, सर्वातिशायिमूल्यः पवनः॥

विनयः – अरे मित्र! शरीरात् न केवलं स्वेदबिन्दवः अपितु स्वेदधाराः इव प्रस्रवन्ति स्मृतिपथमायाति शुक्लमहोदयैः रचितः श्लोकः।

तप्तैर्वाताघातैरवितुं लोकान् नभसि मेघाः,
आरक्षिविभागजना इव समये नैव दृश्यन्ते ॥

**(क) एकपदेन उत्तरत-** **2Q×1/2M=1M**

i) स्वेदधाराः इव के प्रस्रवन्ति?= **स्वेदबिन्दवः** ii) वैभवः केन पीड़ितः गृहात् निष्क्रामति?= **प्रचण्डोष्मणा**

**(ख) पुर्णवाक्येन उत्तरत- ( केवलं प्रश्न एकम् )** **1Q×2M =2 M**

i) परमिन्दर् बहिः आगत्य किं पश्यति ? **उत्तरम्**= बहिरागत्यापि पश्यामि यत् वायुवेगः तु सर्वथाऽवरुद्धः।

**(ग) यथानिर्देशम् उत्तरत-** **2Q×1M=2M**

i) 'श्लोके 'दृश्यन्ते' इति क्रियायाः कर्तृपदं किम्? (क) लोकान् (ख) तप्तैः **(ग) मेघाः**

ii) संवादे 'दुःखितः' पदस्य कः पर्यायः लिखितः? (क) वैभवः (ख) प्रभावः **(ग) पीडितः**

**प्र. 10- रेखाङ्कितानि पदानि आधृत्य प्रश्न निर्माणं कुरुत- (कोऽपि चत्वारः)** **4Q×1M=4M**

i) अस्मिन् पाठे कविः **<u>हिमालयस्य</u>** वर्णनं करोति।
उत्तरम्- अस्मिन् पाठे कविः **<u>कस्य</u>** वर्णनं करोति?

ii) हिमालयः **<u>उत्तरस्यां</u>** दिशि वर्तते।
उत्तरम्- हिमालयः **<u>कस्याम्</u>** दिशि वर्तते?

iii) सावित्र्याः मृत्युः **<u>महारोगेण</u>** अभवत्।
उत्तरम्- सावित्र्याः मृत्युः **<u>केन</u>** अभवत्?

iv) पृथिव्याः **<u>छायापातेन</u>** चन्द्रस्य प्रकाशः अवरूध्यते।
उत्तरम्- पृथिव्याः **<u>केन</u>** चन्द्रस्य प्रकाशः अवरूध्यते?

v) **<u>वायुवेगः</u>** सर्वथाऽवरुद्धः आसीत्।
उत्तरम्- **<u>कः</u>** सर्वथाऽवरुद्धः आसीत्?

vi) अधुना प्लास्टिकनिर्मितानि **<u>वस्तूनि</u>** प्रायः प्राप्यन्ते।
उत्तरम्- अधुना प्लास्टिकनिर्मितानि **<u>कानि</u>** प्रायः प्राप्यन्ते?

**प्र. 11- विलोम पदानि मेलयत-** **3Q×1M =3M**

| | (अ) | (ब) |
|---|---|---|
| i) | आदानम् = **प्रदानम्** | अस्तः |
| ii) | व्यक्तिगतम् = **सार्वजनिक** | समता |
| iii) | विषमता = **समता** | प्रदानम् |
| iv) | उदयः = **अस्तः** | सार्वजनिक |

# समाप्तम्